# अथ भृग्वर्षिमन्त्रप्रयोगविधिः

अथ संकल्पः :-

ॐ अस्य भृग्वर्षिमहामन्त्रस्य भरद्वाजर्षिः, त्रिष्टुप्छन्दः, भृगुर्देवता, भृं बीजं, ह्रीं शक्तिः क्लीं कीलकम्, भृग्वर्षिप्रसादसिद्ध्यर्थे जपे विनियोगः।

अथ ऋष्यादिन्यासः :-

ॐ श्रीभरद्वाजर्षये नमः - शिरसि। ॐ श्रीभृग्वर्षिदेवतायै नमः - हृदये। ॐ श्रीत्रिष्टुप्छन्दसे नमः - मुखे। ॐ भृं बीजाय नमः - गुह्ये। ॐ ह्रीं शक्तये नमः- पादयोः। ॐ क्लीं कीलकाय नमः - नाभौ। ॐ भृग्वर्षि-प्रसादसिद्ध्यर्थे जपे विनियोगाय नमः - सर्वांगे।

| अथ मन्त्राः | अथ करन्यासः | अथ अंगन्यासः |
|---|---|---|
| ॐ भ्रां नमः | अंगुष्ठाभ्यां नमः | हृदयाय नमः |
| ॐ भ्रीं नमः | तर्जनीभ्यां नमः | शिरसे स्वाहा |
| ॐ भ्रूं नमः | मध्यमाभ्यां नमः | शिखायै वषट् |
| ॐ भ्रैं नमः | अनामिकाभ्यां नमः | कवचाय हुम् |
| ॐ भ्रौं नमः | कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट् |
| ॐ भ्रः नमः | करतलकरपृष्ठाभ्यां नमः | अस्त्राय फट् |

ॐ भूर्भुवःस्वरोमिति दिग्बन्दः।

अथ ध्यानम् :-

जटिलं चाक्षसूत्रं च वरदण्डं कमण्डलुम्।
श्वेतवस्त्रोज्ज्वलं वन्दे सर्वमानवपूजितम्।।

अथ पंचोपचारपूजा :-

ॐ लं पृथिवितत्त्वात्मने भृग्वर्षये गन्धं समर्पयामि।
ॐ हं आकाशतत्त्वात्मने भृग्वर्षये पुष्पमालां समर्पयामि।
ॐ यं वायुतत्त्वात्मने भृग्वर्षये धूपं समर्पयामि। ।
ॐ रं तेजस्तत्त्वात्मने भृग्वर्षये दीपं समर्पयामि।
ॐ वं अमृतात्मकजलतत्त्वात्मने भृग्वर्षये नैवेद्यं समर्पयामि।
ॐ सं सर्वतत्त्वात्मने भृग्वर्षये सर्वोपचारपूजार्थे पुष्पाक्षतानि समर्पयामि।

अथ मन्त्रजपः :-

ॐ भृं श्रीज्योतिःशास्त्रकर्त्रे भृग्वर्षये नमः।

यथाशक्ति मन्त्रजपं कृत्वापुष्पांजलिप्रदक्षिणापूर्वकनमस्कारं कुर्यात्।।

।। इत्यों शम्।।

Created by demo version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM